Shri Surindratirtha Stutyashtakam

# શ્રીસૂરીન્દ્રતીર્થસ્તુત્યષ્ટકમ્

## Document Information

Text title : Surindratirtha Stutyashtakam

File name : sUrIndratIrthastutyaShTakam.itx

Category : deities_misc, gurudev,aShTaka

Location : doc_deities_misc

Author : Vadirajacharya R. Panchamukhi

Transliterated by : Sudeep Dalbanjan

Proofread by : Sudeep Dalbanjan

Latest update : August 21, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 21, 2024

*sanskritdocuments.org*

# શ્રીસૂરીન્દ્રતીર્થસ્તુત્યષ્ટકમ્

(અર્થાલઙ્કારભૂયિષ્ઠા)

રૂપકાલઙ્કારઃ-

શ્રીસૂરીન્દ્રગુરુઃ સુરાહિતસરુઃ સૂરીઢ્યશાસ્ત્રમ્ભરુઃ
દુસ્સૂરાગ્ર્યતમોડપ (સા)હારસુચરુઃ સૂરાભસૂરન્ધરુઃ ।
સીરોત્કર્ષણજાતજાનિમજનિં સંસારનિસ્સારકં
સંસૃત્યાશ્રિતસૂરસારસુગુણાન્ સંસેવકાન્વપાત્વલમ્ ॥ ૧॥

ઉત્પ્રેક્ષાલઙ્કારઃ -

શ્રીસૂરીન્દ્રગુરોઃ સુકીર્તિસરિતઃ સ્તોતોડતિશેતે પરં
ત્રિઃસ્રોતા નુ બિભેતિ સીદનમલં તસ્યાશ્ચસન્તોલને ।
નિઃસ્યન્દઃ સુયશોધુનીવહગતો વ્યાપ્નોતિ ભુમણ્ડલં
ગાઙ્ગૌઘો નિયતં ભુવં પ્રસરતીત્યાહો પરં વિસ્મયમ્ ॥ ૨॥

અતિશયોક્ત્યલઙ્કારઃ

ગૌતમ્યો વરરાઘવેન્દ્રમુનિપો માન્ત્રીં ઋષીણાં વશાં
ગામામોચયદેવ મૃત્યુમુખતો ગોસન્તતેઃ પોષણાત્ ।
વેદાન્તોપનિષત્પ્રમેયવિસરં સંસાધયન્નિત્યશઃ
વેદવ્યાસપદં સમાહિતવતઃ ભક્તપ્રશિષ્યો મુનિઃ ॥ ૩॥

વિરોધભાસાલઙ્કારઃ

સ્વર્ગેશસ્ય સભાસુકાન્તિનિકરં નિર્જિત્ય વિદ્યાસભા
શ્રીસૂરીન્દ્રગુરોસ્તુ ભૂમિવિબુધૈઃ સમ્પાદિતા શોભતે ।
સ્વર્ગીયૈસ્તુ સુધાસુપાનવિતતેઃ સંસાધ્યતે નૈર્જરં
મુક્તિર્વૈતુ ફલં વિચારમથને વિદ્વત્સભાસાધિતે ॥ ૪॥

તુલ્યયોતિતાલઙ્કારઃ -

કલ્પદ્રુઃ સ્વકબીજવાહનવિધામાશ્રિત્ય જાન્ચં દ્રુવં
સમ્પાદ્યાત્મપરમ્પરાં નુ જનયેદિત્યેવ માન્યા ગતિઃ ।

શ્રીસૂરીન્દ્રગુરુશ્ચ કલ્પતરુરિત્યાવ્યાનમાન્યં ગુરું
સ્વીયં પ્રેષ્ઠગુરું પ્રપદ્ય રુચિરં હ્યાપ્નોઽસ્યસારૂપતામ્ ॥ ૫॥

વ્યતિરેકાલઙ્કારઃ -
શ્રીસૂરીન્દ્રગુરુઃ સુરેન્દ્રવિભવશ્ચાધ્યાત્મસમ્પદ્ભરુઃ
ઐન્દ્રી વૈભવરાશિરલ્પસમયા જાધ્યાત્મભૂતિઃ પરમ્ ।
શશ્વત્ સૌખ્યપરા સુસાધનફલા સુજ્ઞાનયજ્ઞૈર્દૃઢા
સચ્છ્રીરાઘવપાદસેવનફલા સદ્રાઘવેન્દ્રાશ્રયા ॥ ૬॥

હેતુમાલાલઙ્કારઃ -
શ્રીસૂરીન્દ્રગુરો કૃપા જનયિતા સદ્રાઘવેન્દ્રે રતિં
સા ભદ્રં જનયેદ્રતિં વરગુરોઃ સચ્છાસ્ત્રપારાયણે ।
જ્ઞાનાઢ્યે સતિ સાધકે ભગવતઃ સત્પ્રીતિમાપ્યેત હિ
પ્રીત્યા તોષતતિં સુસાધિતવતો ધન્યત્વમાશસ્યતે ॥ ૭॥

વિરોધાભાસાલઙ્કારઃ -
શ્રીસૂરીન્દ્રગુરુઃ સુરાધિપનુતઃ સત્કલ્પવૃક્ષાશ્રયઃ
સૂરીણાં રુચિરં મનોભિમતમાઢ્યં હ્યાશુ ચાશ્રાણયેત્ ।
સદ્યાચ્ચામનુસૃત્ય વર્ધયતિ કામં ચૈવ કલ્પદ્રુમઃ
મૌનીન્દ્રશ્ચહૃદિ સ્થિતં દિશતિ સદ્ભિર્વૈ સદા શંસિતઃ ॥ ૮॥

પઞ્ચમુખ્યભિધાભાજા રાઘવેન્દ્રાર્યસૂનુના
વાદિવાજેન રચિતા શ્રીસૂરીન્દ્રગુરુસ્તુતિઃ ॥ ૯॥

ઇતિ શ્રીસૂરીન્દ્રતીર્થસ્તુત્યષ્ટકં સમ્પૂર્ણમ્ ।

રચયિતા ઃ વાચસ્પતિ। ડૉ વાદિરાજાચાર્ય। રા. પઞ્ચમુખિ કુલપતિ,
શ્રીગુરુસાર્વભૌમ સંસ્કૃતવિદ્યાપીઠ, મન્ત્રાલય

Encoded and proofread by Sudeep Dalbanjan

*Shri Surindratirtha Stutyashtakam*

pdf was typeset on August 21, 2024

Please send corrections to *sanskrit@cheerful.com*